यः खड्गे जायते शब्दो नखदण्डादिनाहते ।
स ध्वनिस्तुलनामानं ज्ञानमष्टविधन्त्विदम् ॥
पश्चाद्या निपुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमाः ।
अन्यथावत्कृत्रिमौ ज्ञेयौ तावेव सहजाविति ॥
शतमङ्गानि चत्वारि रूपाणि जातयस्तथा ।
त्रिंशन्नेत्राणि जानीयादरिष्टानि तथैव च ॥
भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः ।
मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः ॥”
अथ खड्गस्य शताङ्गगणना लौहार्णवे ।
“रूप्यस्वर्णगजोरुवृकदमनस्थूलाङ्गकृष्णारुणश्वेता-
म्भोजगदातिलानलकणाग्रन्थिस्थिरातैत्तिराः ।
मालाजीरकषट्पदोर्द्धमरिचथालाश्ववर्हाञ्जन-
चौद्रक्षुद्रकमचिकातुषयवव्रीहिक्षुमासर्षपाः ॥
सिंहीतण्डुलगोशिराशिवनखग्राहाचिकेशोपल-
द्रोणीकाककपालपत्रतुवरीविम्बीफलीसर्षपाः ।
नीलीरक्तवचारसोनसुमनाजिह्वीशमीरोहित-
प्रोष्ठीमारिषमार्कवाखुरतडिम्भेघाद्रिगुञ्जाशराः ॥
दूर्व्वाविल्वमसूरटुण्टुकशटीमार्जारिकाकेतकी-
मन्त्रावचककलायचम्पकवलान्यग्रोधवंशासनाः ।
ज्येष्ठीजालपिपीलिकानलरजः कुष्माण्डरोम-
सूची
कर्कन्धुर्व्वकुलारनालमहिषस्कन्धेत्तुवक्रा इति ॥
प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः
क्रमात् ॥”
अथ तस्य चत्वारि रूपाणि ।
“नीलः कृष्णः पिशङ्गश्च धूम्रश्चेति चतुर्व्विधः ।
वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः ॥”
अथ चतस्रो जातयः ।
“ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्चेति चतुर्व्विधः ।
जातिभेदो विनिर्द्दिष्टः खड्गानां मुनिपुङ्गवैः ॥”
अथ त्रिंशन्नेत्राणि ।
“चक्रं पद्मं गदा शङ्खो डमरुर्द्दुरङ्कुशः ।
छत्त्रं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः ॥
कुम्भः शूलश्च शार्द्दूलः सिंहः सिंहासनं गजः ।
हंसो मयूरो जिह्वा च दशनः खड्ग एव च ॥
पुत्त्रिका चामरं शैलः पुष्पमाला भुजङ्गमः ।
त्रिंशदेतानि नेत्राणि खड्गानां कथितानि वै ॥”
अथ त्रिंशदरिष्टानि ।
“छिद्रं काकपदं रेखा भिन्नं भेकश्च मूषिकः ।
विड़ालः शर्करा नीली मशको भृङ्गवृश्चिके ॥
त्रिबिन्दुः कालिका दारी कपोतः काक एव च ।
खर्परः शकली क्रोड़ी कुशपत्रकणालिके ॥
करालकङ्कखर्ज्जूरभङ्गपुच्छखनित्रकम् ।
लाङ्गलं वड़िशाख्यञ्च मुनिना तत्त्ववेदिना ॥
प्रोक्तान्येतान्यरिष्टानि खड्गानां त्रिंशदेव हि ॥”
अथ द्विविधा भूमिः ।
“दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत् ।”
अथाष्टधा ध्वनिः ।
“हंसक्रौञ्चाश्वढक्कानां काकतन्त्रीखराश्मनाम् ।
ध्वनयोऽष्टविधाः प्रोक्ता नागार्ज्जुनमुनेर्म्मताः ॥”
अथ द्विविधं मानम् ।
“उत्तमाधमभेदेन मानं तद्द्विविधं भवेत् ।
इति प्रोक्तानि सूत्राणि खड्गानां ज्ञानहेतवे ।
एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिपूजितः ॥”
इति सूत्राध्यायः ॥ * ॥
तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत ॥
लौहप्रदीपे ।
“रूप्यपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते ।
ऊर्द्ध्वं तत्तु महामूल्यं रूप्यवज्रमुशन्ति तम् ॥
एष खड्गवरो दद्याल्लक्ष्मीमायुर्यशो बलम् ॥१॥
स्वर्णरेखा वली तन्वी यद्भूमौ निकषोपमा ।
स्वर्णवज्रमिति प्राहुरायुर्लक्ष्मीजयप्रदम् ॥२॥
गजशुण्डाकृतिर्भूमौ कृष्णायामङ्गसम्भवः ।
गजवज्रमिति प्राहू रक्तस्पर्शे तु तद्विशेत् ॥
ज्वरादिव्याधिशमनं तस्य प्रक्षालनाम्भसा ।
अपि क्षीणोऽपि भूपालस्तद्वीर्य्यात् साधयेन्
महीम् ॥३॥
एरण्डबीजप्रतिममङ्गं भूमिः सितेतरा ।
रुरुवज्रमिदं नाम्ना शत्रुदर्पक्षयङ्करः ॥
एतस्य स्पर्शमात्रेण नरः सम्यग्विमुच्यते ।
महिषाख्यमिदं वज्रं केचिदाहुर्मनीषिणः ॥४॥
अङ्गं दमनपत्राभं खड्गे यस्मिन् प्रतीयते ।
विद्याद्दमनवज्रञ्च तज्ज्ञेयं द्विविधं बुधैः ॥
नीला शुभ्रा भवेद्भूमिस्तत्र नीला गरीयसी ।
तस्मिन् पर्य्युषितं तोयं गन्धे दमनकोपमम् ॥
तत्प्रभावान्महीपालः कृत्स्नां पृथ्वीं हि साध-
येत् ॥५”॥
शार्ङ्गधरस्य ।
“एका स्थूला सिता रेखा भूमिर्नीला दृढ़ा यदि ।
स्थूलाङ्गमङ्गवज्रं तद्विद्याल्लक्ष्मीयशःप्रदम् ॥
एतत्क्षते भवेच्छोथः स्थूलश्चिरतरस्थितिः ।
एतं महान्तमपरे वदन्ति खड्गकोविदाः ॥६॥
छायायां दृश्यते भूमौ अङ्गञ्च प्रतिबिम्बितम् ।
चङ्गवज्रं भवेत्तस्य द्विधाभूमिः सितासिता ॥७”॥
लौहप्रदीपेऽपि ।
“निरङ्गं रूप्यपत्राभमीषन्मणिनिभञ्च यत् ।
दुर्लभं तन्महामूल्यं कान्तलौहं प्रचक्षते ॥
कृष्णा भूमिर्भवेत् स्वच्छा पीता वक्राङ्गसङ्गता ।
कृष्णवज्रमिति प्राहुस्तत्क्षते मोह उच्यते ॥”
प्रदीपेऽपि ।
“कृष्णा भूमिः सुवर्णाभमीषच्छुक्लाङ्गसङ्गतम् ।
डाहुलीवज्रकं विद्यात् कालसंज्ञमथापरे ॥८॥
अरुणं सूक्ष्ममूर्द्ध्वञ्चेदङ्गं भूमिः सितेतरा ।
अरुणाख्यमिदं वज्रं शत्रुदर्पनिसूदनम् ॥
सूर्य्यांशुस्पर्शमात्रेण वह्निरूपां वमेत् शिखाम् ।
तस्य स्पर्शनमात्रेण पद्मकोषः स्फुटेन्निशि ॥
दुर्लभं तन्मनुष्याणां भाग्यैः कुत्रापि लभ्यते ।
तद्योजनसहस्रस्य रिष्टं नाशयति ध्रुवम् ॥९॥
श्वेतास्त्रिस्रो यदा रेखा आमूलादुपलक्ष्यते ।
श्वेताङ्गमिति तद्विद्याद्यशोलक्ष्मीबलप्रदम् ॥१०॥
अम्भोजदलसङ्काशमङ्गं भूमिः सितेतरा ।
अम्भोजवज्रं तज्ज्ञेयं कथितं मुनिपुङ्गवैः ॥११॥
अङ्गं यस्य गदाकारं भूमिश्चैव सितेतरा ।
गदावज्रमिदं ब्रूयात् तत्क्षते शूलसम्भवः ॥१२॥
अङ्गं कृष्णतिलाकारं भूमिश्चैव सितासिता ।
तिलवज्रमिदं ज्ञेयं लक्ष्मीबलयशःप्रदम् ॥
तत्क्षते तिलतैलाभा वसा प्रच्यवतेऽधिकम् ।१३।
धूम्रवर्णा भवेद्भूमिरङ्गं वह्निशिखोपमम् ॥
अग्निवज्रमिदं ज्ञेयं शत्रूणां दाहकारकम् ।
अत्र शीतोदकं न्यस्तं तप्तं भवति च क्षणात् ॥
शाणे वह्निं वमेद्यस्तु तथा सूर्य्यांशुसङ्गमात् ।
तत्क्षते बलवान् दाहो दग्धवच्च व्रणो भवेत् ॥
एतत् परमभाग्येन लभ्यते धरणीतले ।१४।
भूमिः सिता तिला वापि अङ्गञ्चेत् पिप्पली-
प्रभम् ॥
कणावज्रमिदं ज्ञेयमन्तर्दाहस्तु तत्क्षते ।१५।
कृष्णाभूमिर्यदैवाङ्गे दृश्यते ग्रन्थिसञ्चयः ॥
ग्रन्थिवज्रमिदं ज्ञेयं वैरिपक्षविनाशनम् ।
तत्क्षते बलवान् दाहस्तृषा च ज्वर एव च ॥१६॥
शालपर्णीदलाकारमङ्गं कृष्णासिपुत्त्रिका ।
स्थिरावज्रमिदं प्राहुस्तत्क्षते वेपथुर्भवेत् ॥१७॥
यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा ।
एतत्तित्तिरिवज्रं स्यात् तत्क्षते बहुवेदनम् ॥१८॥
वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते ।
मालाङ्गमिति तद्विद्यात्तत्तोयं गन्धवद्भवेत् ॥
अत्र तप्तोदकं न्यस्तं शीतं भवति तत्क्षणात् ।
एष दाहपरीतानामन्ते पित्तहतात्मनाम् ॥
भवेत् परमभैषज्यं भाग्येनैतद्धि लभ्यते ।१९।
यदा जीरकसङ्काशमङ्गं भूमिः सितासिता ॥
एतज्जीरकवज्रं स्यात्तत्क्षते तत्क्षणाज्ज्वरः ।२०।
भूमिः सितसितश्चेत्रा अङ्गं भृङ्गाभमिष्यते ॥
तत्र चेन्मध्यमन्यस्तं शोषमाप्नोति केवलम् ।
एतद्भ्रमरवज्रं स्यात्तत्क्षते स्याद्विसूचिका ॥२१॥
ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
ऊर्द्ध्ववज्रमिदं प्राहुर्विषवेगनिसूदनम् ॥”
लौहप्रदीपेऽपि ।
“ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
लाङ्गलाङ्गन्तु तद्विद्यात् स्पर्शे तस्याहिनाशनम् ॥
२२ ॥
अङ्गं मरीचसङ्काशं भवेद्भूमिः सितेतरा ।
मरीचाङ्गमिदं वज्रं तत्क्षते कटुरक्तता ॥
तत्प्रक्षालनतोयेन नश्यन्ति पीनसादयः ।२३।
यदा सर्पफणाकारमङ्गं भूमिस्तु निर्म्मला ॥
भुजङ्गवज्रं तद्विद्यात्तत्क्षते विषवद्रुजा ।
तस्य स्पर्शनमात्रेण भेकः प्राणैर्विमुच्यते ॥
एकस्यास्य प्रसादेन कृत्स्नां शास्ति महीं नृपः ।
२४ ।
यदाश्वखुरसङ्काशमङ्गं भूमिस्तु निर्म्मला ॥
अश्वाङ्गमिति तं विद्यात् खड्गं परमदुर्लभम् ।
तस्य संयोगमात्रेण वाजी मन्दोऽपि धावति ॥
तस्य क्षालनतोयेन हयानां रोगनाशनम् ।
एतत्क्षते भृशं मूर्च्छा दाहश्च भ्रम एव च ॥२५॥
मयूरपिच्छसदृशमङ्गं भूमिः सितेतरा ।
वर्हाङ्गमिति तं विद्यात्तत्क्षते वान्तिरिष्यते ॥
सर्पाणामिह सर्व्वेषामस्य स्पर्शासहिष्णुता ।
एतदेव नृपतिभिर्भाग्यैः कुत्रापि लभ्यते ॥२६॥